# Shri ShivasundaradhyAna Ashtakam

# श्रीशिवसुन्दरध्यानाष्टकम्

## Document Information

Text title : shivasundaradhyAnAShTakam

File name : shivasundaradhyAnAShTakam.itx

Category : shiva, aShTaka, dhyAnam, vrajakishora

Location : doc_shiva

Author : Vrajakishora Tripathi

Transliterated by : Vrajakishora Tripathi

Proofread by : Vrajakishora Tripathi

Latest update : November 29, 2018

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 30, 2023

*sanskritdocuments.org*

# श्रीशिवसुन्दरध्यानाष्टकम्

वन्दे फेननिभं तुषारधवलं वन्दे सुधास्तोमभं
वन्दे दुग्धसमद्युतिं भपतिभं वन्दे मृणालप्रभम् ।
वन्दे कुन्दनगत्विषं रजतभं वन्दे शतादित्यभं
वन्दे श्वेतचयोज्वलं प्रभुमणिं वन्दे शिवं सुन्दरम् ॥ १॥

वन्दे व्यालगलं त्रिशूललसितं वन्दे कलेशालयं
वन्दे कालहरं हलाहलगलं वन्दे कपालप्रियम् ।
वन्दे भालसुलोचनं त्रिनयनं वन्दे महाजूटकं
वन्दे भस्मकलेवरं कलिहरं वन्दे शिवं सुन्दरम् ॥ २॥

वन्दे पर्वतवासिनं शशिधरं वन्दे गणेशप्रियं
वन्दे हैमवतीपतिं सुरपतिं वन्दे कुमारात्मजम् ।
वन्दे कृत्तिकटिं मनोज्ञडमरुं वन्दे च गङ्गाधरं
वन्दे योगविनोदिनं प्रमथिनं वन्दे शिवं सुन्दरम् ॥ ३॥

वन्दे पञ्चमुखं महानटवरं वन्दे दयासागरं
वन्दे विष्णुनतं विरञ्चिविनुतं वन्दे सुराराधितम् ।
वन्दे रावणवन्दितं मुनिगुरुं वन्दे प्रशान्ताननं
वन्देर्द्धप्रमदाङ्गिनं वृषभगं वन्दे शिवं सुन्दरम् ॥ ४॥

वन्दे शक्तिविभूषितं रिपुहरं वन्दे पिनाकान्वितं
वन्दे दैत्यहरं पुरत्रयहरं वन्देन्धकध्वम्सकम् ।
वन्दे हस्तिविमर्दकं गरभुजं वन्दे श्मशानभ्रमं
वन्दे दक्षशिरश्छिदं मखभिदं वन्दे शिवं सुन्दरम् ॥ ५॥

वन्दे मारकमारकं त्रिपुरहं वन्दे कृतान्ताधिपं
वन्दे शत्रुकुलाकरालकुलिषं वन्दे त्रितापान्तकम् ।
वन्दे घोरविषान्तकं शमकरं वन्दे जगत्तारकं
वन्दे व्याधिहरं विपत्क्षयकरं वन्दे शिवं सुन्दरम् ॥ ६॥

वन्दे श्रीपरमेश्वरं मृतिहरं वन्दे जगत्कारणं
वन्दे भास्करचन्द्रवह्निनयनं वन्दे प्रभुं त्र्यम्बकम् ।
वन्दे धीपरिवर्द्धकं दुरितहं वन्देभिषेकप्रियं
वन्दे ज्ञानमहोदधिं बुधपतिं वन्दे शिवं सुन्दरम् ॥ ७॥

वन्दे सर्वभयान्तकं पशुपतिं वन्दे जगद्रक्षकं
वन्दे दुःखविनाशकं भवभिदं वन्दे हरं शङ्करम् ।
वन्दे भक्तगणप्रियं विजयदं वन्दे प्रजावत्सलं
वन्दे शीघ्रवरप्रदं शरणदं वन्दे शिवं सुन्दरम् ॥ ८॥

इति व्रजकिशोरविरचतं श्रीशिवसुन्दरध्यानाष्टकं सम्पूर्णम् ।

Encoded and proofread by Vrajakishora

*Shri ShivasundaradhyAna Ashtakam*

pdf was typeset on August 30, 2023

Please send corrections to *sanskrit@cheerful.com*